# Shri Nimbarka Mahima Ashtakam

# શ્રીનિમ્બાર્કમહિમાષ્ટકમ્

## Document Information

Text title : Nimbarka Mahima Ashtakam

File name : nimbArkamahimAShTakam.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : radhAsarveshvarasharaNadevAchArya

Transliterated by : Saritha Sangameswaran

Proofread by : Saritha Sangameswaran, Mohan Chettoor

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

# શ્રીનિમ્બાર્કમહિમાષ્ટકમ્

રાધામુકુન્દાઽઙ્ઘ્રિસરોજભૃઙ્ગં ભક્તેષ્ટવાઞ્છાતરુમાપ્ત સેવ્યમ્ ।
નવામ્બુદશ્યામલગઞ્જુલાઙ્ગં નિમ્બાર્કમાચાર્યમનુસ્મરામિ ॥ ૧॥

આચર્યવર્યં હરિચક્રરાજં ભવાઽબ્ધિસેતું ભયમુક્તિહેતુમ્ ।
ગિરીન્દ્રગોવર્ધનરાજમાનં નિમ્બાર્કદેવં હૃદિ ભાવયામિ ॥ ૨॥

સુમન્દમેધારતિદાનશીલં નિકુઞ્જકુઞ્જાન્તરનિત્યવાસમ્ ।
શ્રીકૃષ્ણલીલારસપાનમત્તં નિમ્બાર્ક-દેવં મનસા સ્મરામિ ॥ ૩॥

પાખણ્ડકણ્ડૂશમનપ્રવીણં શ્રુત્યર્થ-સમ્યક્પથબોધશીલમ્ ।
ગોવિન્દ-ભક્ત્યા-રસવૃષ્ટિકારમાચાર્યનિમ્બાર્કમિહસ્મરામિ ॥ ૪॥

અનન્તકારુણ્યગુણૈકધામ પ્રશાન્તચિત્તં પ્રચુરપ્રભાવમ્ ।
પ્રેમાતિસાન્દ્રં પરિપૂર્ણકામં નિમ્બાર્કમીડે રસસન્નિધાનમ્ ॥ ૫॥

વેદાન્ત-ગીતાકૃતદિવ્યભાષ્યં સ્વાભાવિકં ભિન્નમભિન્નરૂપમ્ ।
સંસ્થાપિતં વૈ નિજવાદમાદ્યં તં નિમ્બભાનું શિરસા નમામિ ॥ ૬॥

સર્વેશ્વરારાધનદત્તચેતઃ દેવર્ષિવર્યેણ ચ લબ્ધદીક્ષઃ ।
શ્રીધામવૃન્દાવનકુઞ્જસેવી નિમ્બાર્કવર્યો ખલુ મે ગતિઃ સ્યાત્ ॥ ૭॥

યતિસ્વરૂપાય પિતામહાય વ્યાલોકિતો નિમ્બતરૌ દિનેશઃ ।
તં ભાનુકોટિપ્રભમાશુરેવ નિમ્બાર્કમન્તઃ સતતં સ્મરામિ ॥ ૮॥

સ્તોત્રં પુણ્યકરં ચારુ નિમ્બાર્કમહિમાષ્ટકમ્ ।
રાધાસર્વેશ્વરાખ્યેન શરણાન્તેન નિર્મિતમ્ ॥ ૯॥

ઇતિ અનન્ત શ્રીવિભૂષિત જગદ્ગુરુ શ્રીનિમ્બાર્કાચાર્યપીઠાધીશ્વર
શ્રી “શ્રીજી” શ્રીરાધાસર્વેશ્વરશરણદેવાચાર્યજી મહારાજ
પ્રણીતં શ્રીનિમ્બાર્કમહિમાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Saritha Sangameswaran

*Shri Nimbarka Mahima Ashtakam*
pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*